श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवास यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ नवनारसिंह मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नवनारसिंह मङ्गळाशासनम् ॥

श्रीपराङ्कुशयोगीन्द्र शठारिप्रमुखान् गुरून्।
मङ्गळाशासनपरान् महितानिशं भजे॥ १ ॥

जगज्जन्मादिलीलाय जगदानन्दहेतवे।
जगच्चक्षुर्निवासाय श्रीनृसिंहाय मङ्गळम्॥ २ ॥

हिरण्यस्तम्भसंभूतिप्रख्यात परमात्मने।
प्रह्लादार्तिमुषे ज्वालानारसिंहाय मङ्गळम्॥ ३ ॥

गुरुडाद्रिगुहागेहे गजकुण्डसरस्तटे।
हिरण्यस्थाण्वहंकारहारि सिंहाय मङ्गळम्॥ ४ ॥

वारिजावारित भयैः वाणीपतिमुखैस्सुरैः।
महिताय महोदार मालोलायास्तु मङ्गळम्॥ ५ ॥

वराहकुण्डे मेदिन्यै वराहार्थप्रदायिने।
दन्तलग्न हिरण्याक्ष दंष्ट्र सिंहाय मङ्गळम्॥ ६ ॥

गोभूहिरण्यनिर्विण्ण गोभिलज्ञानदायिने।
प्रभञ्जन शुनासीर रञ्जकायास्तु मङ्गळम्॥ ७ ॥

भार्गवाख्य तपस्वीश भावना भावितात्मने।
अक्षय्य तीर तीरस्थ भार्गवायास्तु मङ्गळम्॥ ८ ॥

चतुरानन चेतोब्ज चित्रभानुस्वरूपिणे।
वेदाद्रि गह्वरस्थाय योगानन्दाय मङ्गळम्॥ ९ ॥

www.prapatti.com

हाहाहूह्वाख्य गन्धर्वनृत्त गीत हृतात्मने।
भवहन्तृतटच्छत्रवट सिंहाय मङ्गळम्॥ १० ॥

भारद्वाजमहायोगि महापातक हारिणे।
तापनीय रहस्यार्थ पावनायास्तु मङ्गळम्॥ ११ ॥

श्रीशठारि यतीन्द्रादि योगिहृत्पद्म भानवे।
सर्वत्र परिपूर्णायाहोबिलेशाय मङ्गळम्॥ १२ ॥

मङ्गळाशासनमिदं मानिवास मुनीरितम्।
महनीयं पठन् शृण्वन् मङ्गळायतनं भवेत्॥ १३ ॥

॥ इति नवनारसिंह मङ्गळाशासनं संपूर्णम् ॥

www.prapatti.com